४

अथर्ववेदसंहितासाहित्यम्

प्रस्तावना

भारतीयज्ञानगङ्गायाः स्रोतांसि वेदा एव सन्ति। एवंविधः अन्यो न कोऽपि दीप्ततुल्यः ग्रन्थः अस्ति यः स्वप्रभया न केवलं स्वयं भासितः अपि तु स्वस्य प्रभया समस्तभारतीयवाङ्मयम् एव प्रभासितवान्। 'विद्यन्ते धर्मादयः पुरुषार्था यैस्ते वेदाः' इति बह्वृक्प्रातिशाख्यम्। चतर्षु वेदेषु अथर्ववेदः अतीव अर्वाचीनः। ऋग्वेदस्य बहवः विषयाः अत्र पुनः आलोचिताः। ऋग्वेदादेव बहवः मन्त्राः अत्र यथास्वरूपम् अनुकृताः। अथर्ववेदे केवलं स्वस्य मन्त्राः यदन्येषु वेदेषु नोपलब्धाः-एतादृशाः मन्त्राः अतीव स्वल्पाः सन्ति। तत्र अथर्ववेदस्य संहितासाहित्यम् अतीव महत्त्वपूर्णं वर्तते। पूर्वस्मिन् पाठे ऋगादिवेदत्रयस्य संहिताविषये पूर्वपूर्वाध्याये भवन्तः भवत्यो वा ज्ञातवन्तः ज्ञातवत्यो वा। अस्मिन् अध्याये अथर्ववेदस्य संहिताविषये आलोचना प्रस्तूयते।

उद्देश्यानि

इमं पाठं पठित्वा भवन्तः-

- अथर्ववेदस्य साहित्यविषये ज्ञास्यन्ति।
- अथर्ववेदरूपवृक्षस्य विविधासु दिक्षु प्रसृतानां शाखानां विषये ज्ञातुं शक्ष्यन्ति।
- अथर्ववेदस्य मूलप्रतिपाद्यविषयान् ज्ञास्यन्ति।
- स्त्री-राजादीनां वैदिककर्मविषये ज्ञास्यन्ति।

४.१) भूमिका

वेदेष्वथर्ववेदः महत् स्थानम् अधिकरोति। ऋग्वेदादित्रयो वेदाः आमुष्मिकफलदातारः सन्ति। किम्बहुना वेदेषु अथर्ववेदो बहुलविशिष्टतां निदधाति। यदा हि ऋग्वेदादयः त्रयो वेदा आमुष्मिकं फलं प्रददति तदाऽयं अथर्ववेद ऐहिकम् अपि फलं प्रयच्छति। जीवनं सुखसमन्वितं कर्त्तुं येषां साधनानाम् अपेक्षा भवति, तेषां सिद्ध्यर्थम् इह वेदे विविधानाम् अनुष्ठानानां विधानम् अस्ति। पतञ्जलिः यद्यपि अस्य वेदस्य नवशाखाः इति समुल्लिखति, तथापि इदानीं तु पैप्पलाद-शौनकसंज्ञके द्वे एव शाखे लभ्येते। अथर्वसंहितायाः शौनकशाखा पैप्पलादशाखा च अचिरेणैव मुद्रिते स्तः।

कस्यापि यज्ञस्य सम्पूर्णरूपेण निष्पादनार्थं चत्वारः ऋत्विजो भवन्ति। तेषु ब्रह्मा इति नामकः ऋत्विग् यज्ञस्य अध्यक्षो भवति। अस्य प्रधानकार्यं सर्वत्र कार्येषु सम्यक्तया निरीक्षणं तथा सम्भावितायाः त्रुट्याः मार्जनम् इति। एतदर्थं ब्रह्मणा सर्ववेदविदा भवितव्यम्। तेन मनसा बलेनाऽपि सम्पन्नेन भवितव्यम्। किञ्च तस्य ब्रह्मणः प्रधानभेदः अथर्ववेद एव भवति। ब्राह्मणग्रन्थेषु ब्रह्मणः महान् गौरवः अनेकत्र वर्णितः अस्ति। गोपथब्राह्मणस्य (३/२) कथनम् अस्ति यत् त्रिभिः वेदैः यज्ञस्यान्तरः पक्ष एव संस्क्रियते। ब्रह्मा मनसाऽन्यतरस्य पक्षस्य संस्कारं करोति। यथा-

'स वा एष त्रिभिर्वेदैर्यज्ञस्यान्यन्तरः पक्षः संस्क्रियते।

मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं संस्करोति।।' (गोप. ब्रा. ३/२)

पुरोहितस्य अथर्ववेदस्य ज्ञानम् अपि आवश्यकं भवति, यदसौ राज्ञः शान्त्यास्तथा पौष्टककार्यस्य च सम्पादनं अथर्ववेदेन एव करोति। अथर्ववेदस्य परिशिष्टे लिखितम् अस्ति- यस्य राज्ञः जनपदे अथर्ववेदस्य ज्ञाता निवसति तस्य राष्ट्रे उपद्रवादिकं न तिष्ठति अपि च तद्राष्टं शीघ्रमेव वृद्धिम् अभिगच्छति इति।एवम् ऐहिक-आमुष्मिक-लौकिकानां पारलौकिकानां च विषयाणां प्रतिपादकत्वेन अथर्ववेदः वैदिकसंहितायां स्ववैशिष्ट्यं स्थापयति।

अथर्ववेदस्य उपलब्धेषु अनेकेषु अभिधानेषु अथर्ववेद-ब्रह्मवेद-अङ्गिरोवेद-अथर्वाङ्गिरसवेदादिनामानि मुख्यानि सन्ति। 'अथर्व'-शब्दस्य व्याख्या तथा तस्य निर्वचनं निरुक्ते तथा गोपथब्राह्मणे च प्राप्यते। 'थर्व'-धातुः कौटिल्यार्थकः तथा हिंसावाचकः अस्ति। अत एवाथर्वशब्दस्यार्थो भवति- अकुटिलवृत्त्या, अहिंसावृत्त्या च मनसः स्थैर्यस्य प्रापकः इति। अस्याः व्युत्पत्त्याः सम्पुष्टौ योगस्य प्रतिपादकाः अनेके प्रसङ्गाः अस्मिन्वेदे सन्ति। ब्रह्मकर्मणः प्रतिपादकत्वेन अथर्ववेदः 'ब्रह्मवेदः' इति कथ्यते। अथर्ववेदस्य ब्रह्मवेदनाम्नः इदम् एव मुख्यकारणम् अस्ति।

'अथर्वाङ्गिरस'-इति पदस्य व्याख्यया प्रतीतो भवति यद्वेदोऽयं ऋषिद्वयेन द्रष्टानां मन्त्राणां समूहं प्रस्तौति। अथर्वनामकेन ऋषिणा दृष्टाः मन्त्राः शान्ति-पुष्टिकर्मयुक्ताः सन्ति। अङ्गिरसेन च दृष्टाः मन्त्रास्तु आभिचारिका (मारण-मोहन-वशीकरणादि-सम्पादकाः) भवन्ति। एवं द्विविधमन्त्राणां सत्त्वाद् वायुपुराणे(६५।२७) तथा ब्रह्माण्डपुराणे(२।१।३६) अथर्ववेदः 'द्विशरीरशिराः' इति कथ्यते। अनेन अभिधानेन स्पष्टो भवति यद् अथर्ववेदे द्विविधा मन्त्राः सङ्गृहीताः सन्ति। शान्तिपौष्टककर्मप्रतिपादकाः मन्त्राः तथा आभिचारिककर्मप्रतिपादकाः मन्त्रः च। आङ्गिरसेन मारण-मोहन-स्तम्भन-विद्वेषण-वशीकरण-उच्चाटनानां प्रख्यातानां षट्कर्मणां विधानं विशदेन दर्शितम्, तथाहि नारदीयपुराणे उक्तम्-

'तत्र चाङ्गिरसे कल्पे षट्कर्माणि सविस्तरम्।

अभिचारविधानेन निर्दिष्टानि स्वयम्भुवा।।'

तैत्तिरीयब्राह्मणे (३/१२/९/१) 'अथर्वणामङ्गिरसां प्रतीची' इत्यस्मिन् पदे अथर्वाङ्गिरसोः मिलितस्वरूपं वर्णितम् अस्ति। सम्भवतः आभ्याम् ऋषिभ्यां दृष्टानां मन्त्रानां समूहः पृथक् सत्ताम् अपि धत्ते। अनया दृष्ट्या गोपथब्राह्मणस्य एकस्मिन्नेव प्रकरणे 'आथर्वणो वेदः सिद्ध्यति' इति 'आङ्गिरसो वेदोऽभवच्चे'ति च वाक्यं प्राप्यते (११/५ ११/१८)। शतपथब्राह्मणे अपि एतयोरुभयोरुल्लेखः प्राप्यते

(१३/४/३/२)। सर्वत्र बाहुल्येन अङ्गिरसाभिधानम् एव उपलभ्यते. तेन अस्यैव ऋषेः अभ्यर्हितत्वं अवगम्यते। एतस्माद् ज्ञायते यदस्मिन् वेदे प्रथमतः शान्तिपौष्टिक-मन्त्राणां सत्ता आसीत् तदनन्तरम् आभिचारिकमन्त्राणां सन्निवेशः अभवत्।

अथर्ववेदस्य बहुविधविचारेण ज्ञायते - यद् द्वयोः धारयोः मिश्रणस्य परिणतफलम् इदम् अस्ति। अनयोः एका धारा अस्ति अथर्वधारा अपरा च अस्ति अङ्गिरोधारा। अथर्व-ऋषिणा दृष्टाः मन्त्राः शान्तिपुष्टिकर्मभिः सह सम्बद्धाः सन्ति। अस्य सङ्केतः भागवतपुराणे अपि प्राप्यते - 'अथर्वणेऽदात् शान्तिं यया यज्ञो वितन्यते' इति (३/२४/२४)। अङ्गिरोधारा आभिचारिकैः कर्मभिः सह सम्बद्धाऽस्ति। येन जनेषु अयं वेदः प्रियः अभवत्। शान्तिकर्मणा सम्बद्धत्वेन अथर्वस्य सम्बन्धः श्रौतयागस्य प्रारम्भादेव अस्ति, पश्चाद् आभिचारिककर्मणा सह तस्य सम्बन्धवशात् राज्ञः पुरोहितवर्गेभ्यो वेदः अयम् अतीव उपयोगी अभवत्। ऋग्यजुस्सामभ्यः अथर्वस्य पार्थक्यं स्पष्टतः ग्रन्थेषु प्राप्यते।

वेदत्रयी यत्र अलौकिकफलदाता अस्ति तत्र अथर्ववेदः लौकिकफलदाता अस्ति। अस्मिन् सन्दर्भे ध्यातव्यम् इदम् अस्ति यत्- जयन्तभट्टेण न्यायमञ्जर्याम् अथर्ववेदस्य एव प्राथमिकत्वम् उद्घोषितम् - "तत्र वेदाश्चत्वारः, प्रथमोऽथर्ववेदः" इति। नागरखण्डः अपि इमम् आद्यवेद इति वदति किञ्च प्रमापयति अपि यद् अथर्ववेद एव सार्वेषां लौकिकानां कार्याणां सिद्ध्यर्थं मुख्यरूपेण प्रयुक्तो भवति। अत एव अयं आद्यवेदः इति प्रथितः, जयन्तभट्टस्तु न्यायमञ्जर्याम् अस्मिन् विषये सविस्तरं विचारं कृतवान्।

राजकार्येषु अपि अथर्ववेदस्य सविशेषमहत्त्वम् अस्ति। राज्ञः कृते शान्तिकपौष्टककर्मणः तुलापुरुषादिदानस्य च महती आवश्यकता भवति। एवंविधानां कर्मणां विधानं प्राधान्येन अथर्ववेदे एव प्राप्यते। अस्मिन् विषये पुराण-स्मृत्यादिग्रन्थेषु बहूनि प्रमाणानि समुपलब्धानि भवन्ति। विष्णुपुराणस्य स्पष्टकथनम् अस्ति यत्- "पौरहित्य-शान्तिक-पौष्टिकादिकर्म इति अथर्ववेदाद् एव ज्ञायते" इति। मत्स्यपुराणस्य कथनम् अस्ति- पुरोहितः अथर्वमन्त्रे ब्राह्मणे च पारङ्गतः स्यात् इति। तथाहि "पुरोहितं तथा अथर्वमन्त्र-ब्राह्मण-पारगम्" इति। कालिदासस्य कथनेन अपि अस्य कथनस्य पुष्टिः भवति। कालिदासेन वशिष्ठमुनेः कृते 'अथर्वनिधिः' इत्येवं विशेषणं दत्तम्, यस्य इदं तात्पर्यम् अस्ति - रघुवंशोद्भवानां कुलपुरोहितः मुनिः वशिष्ठः अथर्वमन्त्राणां तथा तेषां क्रियाकलापानां च भाण्डारः आसीत् (रघु. १/५९)। नृपः अजः अथर्ववेदमन्त्रैः गुरुवशिष्ठेन अभिषिक्तो भूत्वा शत्रुभिः दुर्धर्षः अभवत्। अत्र कालिदासः वशिष्ठं 'अथर्ववेत्ता' इति कथयति। तथाहि रघुवंशे- 'स बभूव दुरासदः परैर्गुरुणाऽथर्वविदा कृतक्रियः'। इति। (८/४)। अथर्ववेदभाष्यभूमिकायां लिखितम् यत् अथर्ववेदस्य ज्ञाता शान्तिकर्मपारगः यस्मिन् राष्ट्रे निवसति तद्राष्ट्रं निरूपद्रवं भूत्वा सततं वर्द्धते इति। तथाहि-

"यस्य राज्ञो जनपदे ह्यर्वाशान्तिपारगाः।
निवसत्यपि तद्राष्ट्रं वर्धते निरुपद्रवम्।।
तस्माद्राजा विशेषेण ह्यथर्वाणं जितेन्द्रियम्।
दान-सम्मानसत्कारैर्नित्यं समभिपूजयेत्।।" इति।

अतः एतत् कथयितुं शक्यते यद् राजपुरोहितानाम् अथर्ववेदस्य मन्त्राणां तथा तैः सम्बद्धानाम् अनुष्ठानानां ज्ञानम् अवश्यम् एव स्यात् इति। अनेन एव कारणेन अथर्ववेदः ऐहिलौकिकः इति कथ्यते, तथाऽन्ये त्रयो वेदाः पारलौकिकाः इति कथ्यन्ते।

४.२) अथर्ववेदस्य शाखा

पस्पशाह्निके "नवधाऽऽथर्वणो मतः" इति लिखित्वा पतञ्जलिना अथर्ववेदस्य नव शाखाः कथिताः। पुराणानुसारेण वेदव्यासमहोदयः यं शिष्यम् अथर्ववेदम् अध्यापितवान् तस्य नाम सुमन्तुः आसीत् (श्रीमद्भागवते १२/७/१-३, वायुपुराणे ६१/४९-५३, विष्णुपुराणे ३/६/९-१३)। भागवते अस्य महति चर्चा अस्ति यत् सुमन्तुः अभिचारप्रधानस्य अस्य वेदस्य मुख्यप्रचारकः आसीत्। तेन असौ 'दारुणमुनिः' इति उपाधिना विभूषितः आसीत्। अथर्ववेदस्य शाखानां विस्तारः पुराणेषु वर्णितः अस्ति। किञ्च भागवते (१२/७/१) स्कन्धस्य नाम निर्दिष्टं नास्ति। अस्मिन् पुराणे सुमन्तोः एव द्वौ शिष्यौ कथितौ पथ्यः देवदर्शः च। उभयोः मध्ये देवदर्श- इति नाम एव प्रामाणिकम् इति प्रतीतः भवति। यतः आथर्वण - महानारायणोपनिषद् स्वात्मानं देवदर्शी इति नाम्ना अथर्वशाखया सह सम्बन्धं स्वीकरोति। तस्मात् देवदर्शः उत देवदर्शी इति नाम एव उपयुक्तं भवति इति प्रतीयते। विष्णुपुराणानुसारेण पथ्यस्य त्रयाणां शिष्याणां नामानि क्रमशः जाबालिः कुमुदादिः तथा शौनकः इति आसीत्। प्रमाणान्तरानुसारेण पथ्यस्य त्रयः शिष्याः आसन् - जाजलिः कुमुदः शौनकः च। देवदर्शस्य चत्वारः शिष्याः आसन् - ब्रह्मवलिः पिप्पलादः शौष्कायणिः अथवा शौक्लायनिः च। एषु शिष्येषु शौनकस्य शिष्यः बभ्रुः तथा सैन्धवायनः इति कथितम्। एभिः मुनिभिः अथर्ववेदस्य विशेषप्रचारः सम्पन्नः अभवत्। प्रपञ्चहृदय-चरणव्यूह-सायणभाष्यादीनाम् उपोद्घातेषु यद्यपि शाखानां सङ्ख्या अभिन्ना तथापि एतेषु नामसु महती भिन्नता दृश्यते। एतेषां तुलनां कृते सति निम्नलिखितानि अभिधानानि भवन्ति - (१) पिप्पलादः, (२) स्तौदः, (३) मोदः, (४) शौनकीयः, (५) जाजलः, (६) जलदः, (७) ब्रह्मवदः, (८) देवदर्शः, (९) चारणवैद्यः च। आसु अथर्ववेदस्य नवशाखासु सम्प्रति शौनकप्पिलादसमाख्ये द्वे एव शाखे प्राप्येते।

४.२.१) पिप्पलादशाखा

पिप्पलादमुनिः एकः महान् अध्यात्मवेत्ता इति प्रतीतः भवति। स्वाध्यात्मविषयकानां संशयानां निवारणाय सुकेशा-भारद्वाजादीनां षण्णां मुनीनां तस्य पार्श्वे आगमनस्य उल्लेखः प्राप्यते। तेन दत्तानि उत्तराणि अपि प्रश्नोपनिषदि सुरक्षितानि सन्ति। पुरा अस्याः संहितायाः विशिष्टा ख्यातिः आसीत्। अस्याः द्वौ ग्रन्थौ आस्ताम्। प्रपञ्चहृदयस्य कथनम् अस्ति यत् - पिप्पलादशाखायाः मन्त्रसंहिता विंशतिकाण्डेषु विभक्ताः सन्ति, तथा तस्याः ब्राह्मणे अष्टौ अध्यायाः सन्ति। पिप्पलादसंहितायाः एका प्रतिलिपिः शारदालिप्यां कश्मीरे उपलब्धा अभवत्। सा पाण्डुलिपिः कश्मीरनृपतिना जर्मनविदुषे राथमहोदयाय उपहाररूपेण प्रेषिता आसीत्। एकाधिकोनविंशतितमे ख्रीष्टाब्दे तस्याः आलोकलेख्यम् अमेरिकातः प्रकाशितः अभवत्। महाभाष्यानुसारेण - 'शन्नो देवीरभीष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः' अथर्ववेदस्य प्रथमः अयं मन्त्रः अस्ति, किञ्च सम्प्रति प्रचलितायां शौनकसंहितायां

षष्ठसूक्तस्य अयं प्रथमः मन्त्रः अस्ति। गुणविष्णुना ज्ञातो भवति यद् अयं मन्त्रः पिप्पलादशाखायाः आदिमो मन्त्रः आसीत् ('शन्नो देवी............अथर्ववेदादिमन्त्रोऽयं पिप्पलाददृष्टः'- छान्दोग्यमन्त्रभाष्ये)। अनेन एव ज्ञातो भवति यद् महाभाष्यकाले अस्याः संहितायाः विशिष्टा ख्यातिः आसीद् इति।

४.२.२) मौदशाखा

महाभाष्ये (४/१/८६), शाबरभाष्ये (१/१/३०) अस्य मौदमुनेः उल्लखः प्राप्यते। मौद-शाखा-विशेषज्ञः अथवा जलदशाखाविशेषज्ञः पुरोहितः यस्मिन् राष्ट्रे निवसति, तस्य राष्ट्रस्य विनाशः भवति -

'पुरोधा जलदो यस्य मौदो वा स्यात् कदाचन।

अब्दाद् दशभ्यो मामेभ्यो राष्ट्रभ्रष्टं भविष्यति।।'

अनेन इयं शाखा अल्पप्रचलिता आसीद् इति बोधः भवति।

४.२.३) शौनकशाखा

सम्प्रति प्रचलिता अथर्वसंहिता गोपथब्राह्मणं च अस्या एव शाखायाः वर्त्तते। तौद-जालज-ब्रह्मवद-देवदर्शादि-संहिताः तु नाममात्रेण एव ख्याताः सन्ति। अथर्वस्य अन्तिमा शाखा चारणवैद्यानां विषये इति कौशिकसूत्रे व्याख्यातम् अस्ति। वायुपुराणाद् ज्ञातः भवति यत् अस्यां शाखायां षड्विंशत्यधिकषट्सहस्रं (६०२६) मन्त्राः आसन्, किन्तु अद्यावधि इयं संहिता समुपलब्धा नास्ति इति।

पाठगतप्रश्नाः-१

१. अथर्ववेदः आमुष्मिकेण सह अपरं किं फलं प्रयच्छति।

२. महर्षिपतञ्जलेः मते अथर्ववेदस्य कति शाखाः।

३. कस्यापि यज्ञस्य सम्पूर्णरूपेण निष्पादनार्थं कति ऋत्विजः भवन्ति।

४. ब्रह्मा- नामकस्य ऋत्विजः प्रधानकार्यं किम् अस्ति।

५. अथर्ववेदस्य विविधेषु अभिधानेषु कानि मुख्यानि।

६. सम्प्रति अथर्ववदेस्य कति शाखाः लभ्यन्ते।

७. ब्रह्मवेदः कः, कथञ्चोच्यते।

८. अथर्वशब्दस्य अर्थः कः।

९. पथ्यस्य त्रयः शिष्याः के आसन्।

१०. शौनकस्य शिष्याः के आसन्।

४.२.४) अथर्ववेदस्य विषयविवेचनम्

अथर्ववेदस्य विषयविवेचनम् अन्यवेदानाम् अपेक्षया नितान्तं निगूढं विलक्षणञ्च अस्ति। अस्मिन् वेदे वर्णितानां विषयाणां विभाजनं त्रिधा कर्तुं शक्यते- (१) आध्यात्मिकम्, (२) आधिभौतिकम्, (३) आधिदैविकञ्चेति। अध्यात्मप्रकरणे-मुख्यतः ब्रह्मजीवविषयकम्, परमात्मविषयकं च वर्णनम् अस्ति। तदनन्तरम् आश्रमाणाम् अपि पर्याप्तनिर्देशः प्राप्यते। आधिभूतप्रकरणे- राज-राज्यशासन-सङ्ग्रामादीनां च वर्णनम् अस्ति। आधिदैवतप्रकरणे- नानादेवतानां, विविधानां यज्ञानां, कालादीनां च विषये सङ्कलनम् अस्ति। एवंविधस्य स्थूलविवेचनस्य पश्चात् विस्तृतविवरणम् अस्ति। तद्यथा-

४.२.५) भैषज्यसूक्तानि

अस्मिन् प्रकरणे रोगाणां चिकित्सासम्बन्धिनां मन्त्राणां तथा विधिविशेषाणाम् अन्तर्भावो भवति। रोगाणाम् उत्पत्तिः अनेककष्टप्रदानां रक्षोभूतपिशाचादीनां उपद्रवेणैव भवति। अतः अस्य प्रकरणस्य अनेकमन्त्रेषु पूर्ववर्णितानाम् उपद्रवाणां शमनोपायः वर्णितः अस्ति। एतेषां मन्त्राणां साहाय्येन कृतानाम् अभिचाराणां विशेषवर्णनं कौशिकसूत्रेऽस्ति। विविधरोगाणां लक्षणं तथा तद्रोगेण समुत्पन्नानां शारीरिकविकाराणाम् आयुर्वेदिकदृष्ट्या विशदवर्णनञ्च अस्ति। अथर्ववेदे-'तक्माः' इति तु ज्वरस्य एव नाम अस्ति। अस्मिन् सन्दर्भेऽथर्ववेदस्य कथनम् अस्ति यद् ज्वरपीडिताः जनाः पीताः सन्तप्ताश्च भवन्ति। अतः कतिपयेषु मन्त्रेषु ज्वरनिमित्तकप्रार्थना वर्त्तते। यथा- हे ज्वर ! त्वं तिरोहितो भव, अथवा रोगार्त्तजनं विहाय मूजवत-वह्निक-महावृषादि-सुदूरस्थप्रान्ते गच्छ (५/२५/७/८)। बलासः(क्षयादिः) रोगः (६/१४), गण्डमाला (६/८३), यक्ष्मा (६/८५) प्रभृतीनां रोगाणां दूरीकरणाय वरुणनामकस्य ओषधेः सेवनस्य उपयोगः प्राप्यते। कासः (६/१०५) तथा दन्तपीडादिरोगाणां तथा तेषाम् ओषधीनां वर्णनम् अतीव उत्तमरीत्या अथर्ववेदेऽस्ति। सर्पविषनाशाय नानाविधाः उपायाः वर्णिताः सन्ति। एकस्मिन् सूक्ते (५/१३) असित-तैमात-आलिङ्गी-विलिङ्गी-उरु-गूलादिसर्पाणां नाम उल्लिखितम् अस्ति। बहुविधानाम् औषधीनां तथा नानावृक्षाणां प्रशंसायाम् अपि अनेके मन्त्राः अत्र सन्ति।

४.२.६) आयुष्यसूक्तानि

दीर्घायुषः कृते बहुविधाः प्रार्थनापरकमन्त्राः अस्मिन् विभागे सन्ति। एतेषां मन्त्राणां विशेषप्रयोगः पारिवारिकमहोत्सवानाम् अवसरे अभवत्। बालकानां मुण्डने, किशोराणां गोदाने (प्रथमक्षौरकर्मणि) तथा उपनयनसंस्कारे अस्य मन्त्रस्य उपयोगो भवति। अस्मिन् सूक्ते शतशरत्पर्यन्तं तथा शतहेमन्तपर्यन्तं जीवनाय, बहुविधमृत्युभ्यः त्राणाय, विविधरोगेभ्यः रक्षणाय च प्रार्थना समुपलब्धा भवति। अथर्ववेदे जीवनकालस्य वर्द्धनाय करे रक्षासूत्रधारणस्य विशेषविधानं प्राप्यते। अनेन रक्षासूत्रधारणेन प्राणिनः पूर्णस्वास्थ्यं लभन्ते इति ज्ञायते। सप्तदशकाण्डस्य एकमात्रं सूक्तम् अत्र अन्तर्भवति।

४.२.७) पौष्टिकसूक्तानि

अत्र गृहनिर्माणाय, सीरकर्षणाय, बीजवपनाय, अन्नोत्पादनाय, पुष्ट्यर्थाय, व्यापारहेतवे विदेशगमनाय नानाविधाशीर्वादाय च प्रार्थना कृताऽस्ति। अस्मिन् विषये सुष्ठुसूक्तम् (अथर्व. ४/१५) एकम् उदाहरणम्। अस्मिन् सूक्ते वृष्ट्याः अतीव रमणीयं, साहित्यिकं तथा समुज्ज्वलं वर्णनम् अस्ति।

४.२.८) प्रायश्चित्तसूक्तानि

एतेषु सूक्तेषु प्रायश्चित्तस्य विधानम् उपलब्धम् अस्ति। चारित्रिकत्रुटेः धार्मिकविरोधस्य तथा अन्यविधिहीनानाम् आचाराणां विधानम्- यथा- ज्ञातस्य अज्ञातस्य वा अपराधस्य हेतुना, धर्मशास्त्रेण वर्जितस्य विवाहस्य कारणेन, ऋणप्रतिशोधाभावहेतुना, ज्येष्ठं विना विवाहहेतुना च ये अपराधाः भवन्ति तेषां दूरीकरणाय अत्र प्रायश्चित्तस्य विधानम् अस्ति। एतत्सम्बन्धिनः एवंविधाः मन्त्राः सन्ति यैः शारीरिकदुर्बलता-मानसिकत्रुटि-दुःस्वप्न-अपशकुनादीनां निराकरणम् अपसरणञ्च भवति। वर्तमानयुगे इव तस्मिन्नपि युगे अशुभस्वप्ने मानवानां विश्वासः आसीत्। तद्दूरीकरणाय बहुविधाः उपायाः मन्त्रेषु वर्णिताः सन्ति।

४.२.९) स्त्रीकर्मविषयकसूक्तानि

विवाहविषयकाणि प्रेमविषयकाणि च बहूनि सूक्तानि अस्मिन् वेदे सन्ति। एतानि सूक्तानि तत्कालिकसमाजस्य स्वरूपज्ञाने विशेषरूपेण सहायकानि भवन्ति। एतेषु सूक्तेषु पुत्रोत्पादनाय सद्योजातशिशोः रक्षणाय च भव्यप्रार्थनाऽपि प्राप्यते। अस्मिन् प्रसङ्गे चतुर्दशकाण्डः विशेषरूपेण सम्बद्धः अस्ति। अनेन एव क्रमेण अथर्ववेदस्य मारण-मोहन-उच्चाटन-वशीकरणादीनां क्रियाणां बहुलप्रयोगाः वर्णिताः सन्ति। कौशिकसूक्ते नारीप्रेमसम्पादनाय बहुविधायाः आभिचारिकक्रियायाः वर्णनम् अस्ति।

४.२.१०) राजकर्मविषयकसूक्तानि

राजभिः सम्बद्धानि बहूनि सूक्तानि अथर्ववेदे समुपलब्धानि सन्ति। एतेषां सूक्तानाम् अध्ययनेन तात्कालिकराजनैतिक्याः स्थित्याः विशदचित्रणं समुपलब्धं भवति। शत्रूणां विनाशाय प्रार्थनया सह सङ्ग्रामस्य तथा तदुपयोगिनां साधनानां यथा- रथ-दुन्दुभि-शङ्खादीनां विशेषविविरणं साङ्ग्रामिकदृष्ट्या अपि अथर्ववेदस्य महत्तां सूचयति। अथर्ववेदस्य 'क्षत्रवेदः' इति नामकरणस्य इदम् एव कारणम् अस्ति। तस्मिन् युगे प्रजाः एव राज्ञः संवरणम् कृतवन्तः। अत्र मानवैः सह अश्विन्-मित्रावरुणादिद्वारेण राज्ञः संवरणस्य वर्णनम् अस्ति। अन्धसूक्ते (३/३) ज्ञातो भवति यद्देशात् निष्कासितो राजा पुनः राज्ये सम्मानपूर्वकेण प्रतिष्ठितः अभवत्। सङ्ग्रामभूमौ गमनाय वीरान् समुत्साहयितुं दुन्दुभेः वर्णनम् अतीव साहित्यिकं वीररसपूर्णञ्च अस्ति। पञ्चमकाण्डस्य दशमसूक्तं कवित्वदृष्ट्या, मनोहरभावानां प्रदर्शनेन च

अतीव रोचकं, सरसं तथा अभिव्यञ्जनात्मकञ्च अस्ति। दुन्दुभेः गर्जनं श्रुत्वा रिपुयुवत्याः भयानकास्त्रसङ्घर्षाणां मध्ये स्वपुत्रं नीत्वा पलायनस्य प्रार्थनाऽपि अतीव कारुणिका अस्ति। (अथर्व. ५/२०/५)।

पाठगतप्रश्नाः-२

११. अथर्ववेदे वर्णितानां विषयाणां के भेदाः।

१२. रोगाणाम् उत्पत्तिः कथं भवति।

१३. अथर्ववेदे तक्माः इति कस्य नाम ।

१४. जीवनकालस्य वर्धनाय कस्य विशेषविधानम् अस्ति।

१५. विवाहविषयकाणि प्रेमविषयकाणि च सूक्तानि कुत्र उपलभ्यन्ते।

१६. क्षत्रवेदः इति नाम्ना कथम् अथर्ववेदः प्रसिद्धः।

पाठसारः

वेदेष्वथर्ववेदः वेदान्तवत् महत् स्थानम् अधिकरोति। ऋग्वेदादित्रयो वेदाः आमुष्मिकफलदातारः सन्ति। विषेशतः अथर्ववेदे लौकिकविषयाणाम् एव चर्चा अधीकरूपेण प्राप्यते। अथर्ववेदस्य ब्रह्मवेद-अङ्गिरोवेद-अथर्वाङ्गिरसवेदादीनि नामानि अपि प्रसिद्धानि सन्ति। 'अथर्व'-शब्दस्य व्याख्या तथा तस्य निर्वचनं निरुक्ते (११/२/१७) तथा गोपथब्राह्मणे च (१/४) प्राप्यते। अस्य अथर्ववेदस्य विविधाः शाखाः उपलभ्यन्ते। तेषु प्रायेण सर्वत्र लौकिकानाम् एव विषयाणां वर्णनम् अस्ति।

अस्मिन् वेदे वर्णितानां विषयाणां विभाजनं त्रिधा कर्तुं शक्यते- (१) आध्यात्मिकम्, (२) आधिभौतिकम्, (३) आधिदैविकञ्चेति। तत्र च विविधेषु सूक्तेषु लौकिकविषयाणां राजकर्मादीनां विधानम् अस्ति। यथा- भैषज्यसूक्तेषु विविधानां रोगाणां वर्णनं तथा तेषां शमनाय विविधाः उपायाः वर्णिताः सन्ति। आयुष्यसूक्तेषु दीर्घायुषः कृते प्रार्थना विहिता। अत्र विहितानां सूक्तानां विशेषप्रयोगः पारिवारिकमहोत्सवानाम् अवसरे भवन्ति। किञ्च अत्र शतशरत्पर्यन्तं तथा शतहेमन्तपर्यन्तं जीवनाय प्रार्थनाः सन्ति। पौष्टिकसूक्तेषु गृहनिर्माणाय, सीरकर्षणाय, बीजवपनाय, अन्नोत्पादनाय किञ्च अन्यगार्हस्थ्यकर्मणां कृते प्रार्थनाः सन्ति। अत्र विविधानाम् अपराधानां प्रायश्चित्ताय प्रार्थनाः सन्ति। अपि च अत्र प्रेमविषयकाणि विवाहविषयकाणि च विविधानि सूक्तानि उपलभ्यन्ते।

विवधराजकर्मविषयकाणि अपि सूक्तानि अत्र प्राप्यन्ते। यथा- शत्रूणां विनाशाय प्रार्थनया सह सङ्ग्रामस्य तथा तदुपयोगिनां साधनानां विशेषविविरणं प्राप्यते। अस्मात् कारणात् अथर्ववेदस्य 'क्षत्रवेदः' इत्यपि अपरं नाम भवति।

पाठान्तप्रश्नाः

१. पिप्पलादशाखा विषये लिखत।

२. भैषज्यसूक्तविषये विस्तारेण लिखत।

३. प्रायश्चित्तविषये अथर्ववेदे यद् उक्तं तद्विस्तारेण लिखत।

४. स्त्रीकर्मविषये अथर्ववेदे यद् उक्तं, तद्विस्तारेण लिखत।

५. राजकर्मविषये अथर्ववेदे यद् उक्तं तल्लिखत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. ऐहिकमपि फलं प्रददाति।

२. नव।

३. चत्वारः।

४. ब्रह्मानामकस्य ऋत्विजः प्रधानं कार्यं सर्वत्र कार्येषु सम्यक्तया निरीक्षणं तथा सम्भाविताया: त्रुट्याः मार्जनम्।

५. अथर्ववेद-ब्रह्मवेद-अङ्गिरोवेद-अथर्वाङ्गिरसवेदादीनि अभिधानानि मुख्यानि।

६. द्वे, शौनकशाखा पिप्पलादशाखा चेति।

७. ब्रह्मकर्मणः प्रतिपादकत्वेनाथर्ववेदः 'ब्रह्मवेदः' कथ्यते।

८. अकुटिलतावृत्त्या, अहिंसावृत्त्या च मनसः स्थैर्यप्राप्तिकर्त्री व्यक्तिः।

९. पथ्यस्य त्रयः शिष्याः आसन्- जाजलिः, कुमुदः, शौनकश्च।

१०. शौनकस्य द्वै शिष्यौ स्तः, बभ्रः सैन्धवायनश्चेति।

उत्तराणि-२

११. (१) आध्यात्मिकम्, (२) आधिभौतिकम्, (३) आधिदैविकञ्चेति।

१२. रोगाणाम् उत्पत्तिः अनेककष्टप्रदानां रक्षोभूतपिशाचादीनां उपद्रवेणैव भवति।

१३. ज्वरस्य नाम।

१४. रक्षासूत्रधारणस्य।

१५. स्त्रीकर्मविषयकसूक्तेषु।

१६. शत्रूणां विनाशाय प्रार्थनया सह सङ्ग्रामस्य तथा तदुपयोगिनां साधनानां वर्णनात् अथर्ववेदः 'क्षत्रवेदः' इति नाम्ना प्रसिद्धः।

।।इति चतुर्थः पाठः।।